শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে

# ॥ ষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষষ্টিতমঃ সর্গঃ ॥

## ৱিলপতা শ্রীরামেণ ৱৃক্ষান্ পশূংশ্চ প্রতি সীতাৱিষযকৱার্তাযা জিজ্ঞাসনং ভ্রান্তস্য তস্য রোদনং ভূযো ভূযস্তেন সীতাযা অন্ৱেষণং চ

ভৃশমাৱ্রজমানস্য তস্যাধো ৱামলোচনম্।
প্রাস্ফুরচ্চাস্খলদ্ রামো ৱেপথুশ্চাস্য জাযতে॥ **3.60.1** ॥

উপালক্ষ্য নিমিত্তানি সোঽশুভানি মুহুর্মুহুঃ।
অপি ক্ষেমং তু সীতাযা ইতি ৱৈ ৱ্যাজহার হ॥ **3.60.2** ॥

ৎৱরমাণো জগামাথ সীতাদর্শনলালসঃ।
শূন্যমাৱসথং দৃষ্টৱা বভূৱোদ্ৱিগ্নমানসঃ॥ **3.60.3** ॥

উদ্ভ্রমন্নিৱ ৱেগেন ৱিক্ষিপন্ রঘুনন্দনঃ।
তত্র তত্রোটজস্থানমভিৱীক্ষ্য সমন্ততঃ॥ **3.60.4** ॥

দদর্শ পর্ণশালাং চ সীতযা রহিতাং তদা।
শ্রিযা ৱিরহিতাং ধ্ৱস্তাং হেমন্তে পদ্মিনীমিৱ॥ **3.60.5** ॥

রুদন্তমিৱ ৱৃক্ষৈশ্চ গ্লানপুষ্পমৃগদ্ৱিজম্।
শ্রিযা ৱিহীনং ৱিধ্ৱস্তং সন্ত্যক্তং ৱনদৈৱতৈঃ॥ **3.60.6** ॥

ৱিপ্রকীর্ণাজিনকুশং ৱিপ্রৱিদ্ধবৃসীকটম্।
দৃষ্টৱা শূন্যোটজস্থানং ৱিললাপ পুনঃ পুনঃ॥ **3.60.7** ॥

হৃতা মৃতা ৱা নষ্টা ৱা ভক্ষিতা ৱা ভৱিষ্যতি।
নিলীনাপ্যথৱা ভীরুরথৱা ৱনমাশ্রিতা॥ **3.60.8** ॥

গতা ৱিচেতুং পুষ্পাণি ফলান্যপি চ ৱা পুনঃ।
অথৱা পদ্মিনীং যাতা জলার্থং ৱা নদীং গতা॥ **3.60.9** ॥

যত্নান্মৃগযমাণস্তু নাসসাদ ৱনে প্রিযাম্।
শোকরক্তেক্ষণঃ শ্রীমানুন্মত্ত ইৱ লক্ষ্যতে॥ **3.60.10** ॥

ৱৃক্ষাদ্ ৱৃক্ষং প্রধাৱন্ স গিরীংশ্চাপি নদীনদম্।
বভ্রাম ৱিলপন্ রামঃ শোকপঙ্কার্ণৱপ্লুতঃ॥ **3.60.11** ॥

অস্তি কচ্চিত্ত্ৱযা দৃষ্টা সা কদম্বপ্রিযা প্রিযা।
কদম্ব যদি জানীষে শংস সীতাং শুভাননাম্॥ **3.60.12** ॥

স্নিগ্ধপল্লৱসঙ্কাশাং পীতকৌশেযৱাসিনীম্।
শংসস্ৱ যদি সা দৃষ্টা বিল্ৱ বিল্ৱোপমস্তনী॥ **3.60.13** ॥

অথৱার্জুন শংস ৎৱং প্রিযাং তামর্জুনপ্রিযাম্।
জনকস্য সুতা তন্ৱী যদি জীৱতি ৱা ন ৱা॥ **3.60.14** ॥

ককুভঃ ককুভোরুং তাং ৱ্যক্তং জানাতি মৈথিলীম্।
লতাপল্লৱপুষ্পাঢ্যো ভাতি হ্যেষ ৱনস্পতিঃ॥ **3.60.15** ॥

ভ্রমরৈরুপগীতশ্চ যথা দ্রুমৱরো হ্যসি।
এষ ৱ্যক্তং ৱিজানাতি তিলকস্তিলকপ্রিযাম্॥ **3.60.16** ॥

অশোক শোকাপনুদ শোকোপহতচেতনম্।
ৎৱন্নামানং কুরু ক্ষিপ্রং প্রিযাসন্দর্শনেন মাম্॥ **3.60.17** ॥

যদি তাল ৎৱযা দৃষ্টা পক্ৱতালোপমস্তনী।
কথযস্ৱ ৱরারোহাং কারুণ্যং যদি তে মযি॥ **3.60.18** ॥

যদি দৃষ্টা ৎৱযা জম্বো জাম্বূনদসমপ্রভা।
প্রিযাং যদি ৱিজানাসি নিঃশঙ্ক কথযস্ৱ মে॥ **3.60.19** ॥

অহো ৎৱং কর্ণিকারাদ্য পুষ্পিতঃ শোভসে ভৃশম্।
কর্ণিকারপ্রিযাং সাধ্ৱীং শংস দৃষ্টা যদি প্রিযা॥ **3.60.20** ॥

চূতনীপমহাসালান্ পনসান্ কুরৱান্ ধৱান্।
দাডিমানপি তান্ গৎৱা দৃষ্টৱা রামো মহাযশাঃ॥ **3.60.21** ॥

বকুলানথ পুন্নাগাংশ্চন্দনান্ কেতকাংস্তথা।
পৃচ্ছন্ রামো ৱনে ভ্রান্ত উন্মত্ত ইৱ লক্ষ্যতে॥ **3.60.22** ॥

অথৱা মৃগশাৱাক্ষীং মৃগ জানাসি মৈথিলীম্।
মৃগৱিপ্রেক্ষণী কান্তা মৃগীভিঃ সহিতা ভৱেৎ॥ **3.60.23** ॥

গজ সা গজনাসোরুর্যদি দৃষ্টা ৎৱযা ভৱেৎ।
তাং মন্যে ৱিদিতাং তুভ্যমাখ্যাহি ৱরৱারণ॥ **3.60.24** ॥

শার্দূল যদি সা দৃষ্টা প্রিযা চন্দ্রনিভাননা।
মৈথিলী মম ৱিস্রব্ধঃ কথযস্ৱ ন তে ভযম্॥ **3.60.25** ॥

কিং ধাৱসি প্রিযে নূনং দৃষ্টাসি কমলেক্ষণে।
ৱৃক্ষৈরাচ্ছাদ্য চাত্মানং কিং মাং ন প্রতিভাষসে॥ **3.60.26** ॥

তিষ্ঠ তিষ্ঠ ৱরারোহে ন তেঽস্তি করুণা মযি।
নাত্যর্থং হাস্যশীলাসি কিমর্থং মামুপেক্ষসে॥ **3.60.27** ॥

পীতকৌশেযকেনাসি সূচিতা ৱরৱর্ণিনি।
ধাৱন্ত্যপি মযা দৃষ্টা তিষ্ঠ যদ্যস্তি সৌহৃদম্॥ **3.60.28** ॥

নৈৱ সা নূনমথৱা হিংসিতা চারুহাসিনী।
কৃচ্ছ্রং প্রাপ্তং ন মাং নূনং যথোপেক্ষিতুমর্হতি॥ **3.60.29** ॥

ৰ্য্যক্তং সা ভক্ষিতা বালা রাক্ষসৈঃ পিশিতাশনৈঃ।
ৰিভজ্যাঙ্গানি সর্ৱাণি মযা ৰিরহিতা প্রিযা॥ **3.60.30** ॥

নূনং তচ্ছুভদন্তোষ্ঠং সুনাসং শুভকুণ্ডলম্।
পূর্ণচন্দ্রনিভং গ্রস্তং মুখং নিষ্প্রভতাং গতম্॥ **3.60.31** ॥

সা হি চম্পকৱর্ণাভা গ্রীৱা গ্রৈৱেযকোচিতা।
কোমলা ৰিলপন্ত্যাস্তু কান্তাযা ভক্ষিতা শুভা॥ **3.60.32** ॥

নূনং ৰিক্ষিপ্যমাণৌ তৌ বাহূ পল্লৱকোমলৌ।
ভক্ষিতৌ ৱেপমানাগ্রৌ সহস্তাভরণাঙ্গদৌ॥ **3.60.33** ॥

মযা ৰিরহিতা বালা রক্ষসাং ভক্ষণায ৱৈ।
সার্থেনেৱ পরিত্যক্তা ভক্ষিতা বহুবান্ধৱা॥ **3.60.34** ॥

হা লক্ষ্মণ মহাবাহো পশ্যসে ৎৱং প্রিযাং ক্বচিৎ।
হা প্রিযে ক্ব গতা ভদ্রে হা সীতেতি পুনঃ পুনঃ॥ **3.60.35** ॥

ইত্যেৱং ৰিলপন্ রামঃ পরিধাৱন্ ৱনাদ্ ৱনম্।
ক্বচিদুদ্ভ্রমতে ৱেগাৎ ক্বচিদ্ ৰিভ্রমতে বলাৎ॥ **3.60.36** ॥

ক্বচিন্মত্ত ইৱাভাতি কান্তান্ৱেষণতৎপরঃ।
স ৱনানি নদীঃ শৈলান্ গিরিপ্রস্রৱণানি চ।
কাননানি চ ৱেগেন ভ্রমত্যপরিসংস্থিতঃ॥ **3.60.37** ॥

তদা স গৎৱা ৰিপুলং মহদ্ ৱনং
পরীত্য সর্ৱং ৎৱথ মৈথিলীং প্রতি।
অনিষ্ঠিতাশঃ স চকার মার্গণে
পুনঃ প্রিযাযাঃ পরমং পরিশ্রমম্॥ **3.60.38** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে ষষ্টিতমঃ সর্গঃ ॥